# *॥ ભાગ્યસૂક્તમ ॥*

*તૈત્તરીય બ્રાહ્મણમ, અષ્ટકમ – 2, પ્રશ્ન: – 8, અનુવાક્ય – 9*

ૐ પ્રાતરગ્નિં પ્રાતરિન્દ્રગં હવામહે પ્રાતર્મિત્રા વરુણા પ્રાતરશ્વિના ।
પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતસ્સોમમુત રુદ્રગં હુવેમ ॥ 1 ॥

પ્રાતર્જિતં ભગમુગ્રગં હુવેમ વયં પુત્ર–મદિતેર્યો વિધર્તા ।
આદ્ધ્રશ્ચિદ્યં મન્યમાનસ્તુરશ્ચિદ્રાજા ચિદ્યં ભગં ભક્ષીત્યાહ ॥ 2 ॥

ભગ પ્રણેત–ર્ભગ સત્યરાધો ભગેમાં ધિયમુદવદદન્નઃ ।
ભગપ્રણો જનય ગોભિ–રશ્વૈર્ભગપ્રનૃભિ–ર્નૃવન્તસ્સ્યામ ॥ 3 ॥

ઉતેદાનીં ભગવન્તસ્સ્યામોત પ્રપિત્વ ઉત મધ્યે અહ્નામ ।
ઉતોદિતા મઘવન થ્સૂર્યસ્ય વયં દેવાનાગં સુમતૌ સ્યામ ॥ 4 ॥

ભગ એવ ભગવાગં અસ્તુ દેવાસ્તેન વયં ભગવન્તસ્સ્યામ ।
તં ત્વા ભગ સર્વ ઈજ્જોહવીમિ સનો ભગ પુર એતા ભવેહ ॥ 5 ॥

સમધ્વરાયોષસોટનમન્ત દધિક્રાવેવ શુચયે પદાય ।
અર્વાચીનં વસુવિદં ભગન્નો રથમિવાશ્વાજિન આવહન્તુ ॥ 6 ॥

અશ્વાવતી–ર્ગોમતીર્ન ઉષાસો વીરવતીસ્સદ–મુચ્છન્તુ ભદ્રાઃ ।
ઘૃતં દુહાના વિશ્વતઃ પ્રપીનાયૂયં પાત સ્વસ્તિભિસ્સદા નઃ ॥ 7 ॥

યો માટગ્ને ભાગિનગં સન્ત–મથાભાગં ચિકીર્ષતિ ।
અભાગમગ્ને તં કુરુ મામગ્ને ભાગિનં કુરુ ॥ 8 ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

www.YouSigma.com